तादृशेच्छाविषयीभूतज्ञानजनकाद्ब्राह्मणः पचतीत्युत्तरवाक्यात्तन्निवृत्तिरिति तादृशप्रश्नानन्तरं तथैवोत्तरं प्रयुज्यते । न चैवं प्रमेयः पचतीत्युत्तरवाक्यमेव कथं तादृशप्रश्नानन्तरं न प्रयुज्यते तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यं जिज्ञासाविषयीभूतस्वसमभिव्याहृतपदोपस्थाप्यविधेयन्यूनवृत्तिधर्मावच्छिन्नएव तादृशकिंपदस्य शक्त्यभ्युपगमात् । अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिंपदस्य शक्यतावच्छेदकगर्भे च स्वार्थाभेदान्वयितावच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वमपि धर्म्मांशे विशेषणं देयमतः को ब्राह्मणः पचतीत्यादिप्रश्नानन्तरञ्चैत्रः पचतीत्यादिकमुत्तरवाक्यं प्रयुज्यते नतु मनुष्यः पचतीत्यादिकं मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात्तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयेच्छायास्तत्राप्रतीतेः एवं यत्रोद्देश्यतावच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तदन्वयितावच्छेदकधर्म्मावच्छिन्नविशेषणतापन्नतदन्वयितावच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतज्ञानगोचरेच्छा किंपदेन बोध्यतेऽतः कति घटाः सन्तीत्यादौ डतिप्रत्ययार्थे संख्यादौ किंपदार्थस्य जिज्ञासितधर्म्मावच्छिन्नस्याभेदेनान्वयात् संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यतावच्छेदकताकबोधजनकं दशसंख्यका घटाः सन्तीत्युत्तरं तत्र प्रयुज्यते । यत्रोद्देश्यतावच्छेदकीभूतविभक्त्याद्यर्थे भेदेन किंपदार्थान्वयः कस्य पुत्रः सुन्दर इत्यादौ तत्र यादृशसम्बन्धेन यदवच्छिन्ने यदन्वयस्तत्र तादृशसम्बन्धेन विशेषधर्म्मावच्छिन्नविशेषिततदवच्छिन्ननिष्ठोद्देश्यतावच्छेदकतावच्छेदकताकप्रकृतविधेयज्ञानगोचरेच्छा प्रतीयते एवं विधेयवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो विशेषधर्म्मस्तदवच्छिन्ने शक्तिरित्ययं क इत्यादौ इदन्त्वावच्छिन्नांशे विधेयतावच्छेदकत्वेन जिज्ञासितधर्म्मवानित्याकारकोऽन्वयबोधः । तेन तद्विषयकजिज्ञासाजनकज्ञानजनकं चायं ब्राह्मण इत्याद्युत्तरवाक्यं तादृशप्रश्नानन्तरं प्रयुज्यते । एवं यत्र वैधेये विधेयतावच्छेदके वा किंपदार्थस्य तदवच्छेदकधर्मस्याभेदेन वान्वयः इदं किम् इदं किंधनं भवतः कति पुत्राः भवान् कस्य पुत्र इत्यादौ रीतिः पूर्ववदूहनीया "किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ । कटौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ तडिद्वा तारा वा कनकलतिका वा किमबला" इत्यादावव्ययकिमो वाशब्दस्येव वितर्कोऽर्थः । वितर्कश्च प्रयोक्तुः सम्भावनात्मकं ज्ञानं तदर्थस्य च विशेष्यतासम्बन्धेन प्रथमान्तपदोपस्थाप्यविशेष्ये प्रकारितासम्बन्धेन तत्र च विशेषणस्य चन्द्रादेरन्वयः नामार्थेनाव्ययार्थस्य भेदान्वयेऽविरोधात् । यत्र विशेषणवाचकमपि प्रथमान्तं तत्राभेदसम्बन्धावच्छिन्नप्रकारितासंसर्गः यत्र तु प्रकृत्यर्थस्य विशेष्यतया स्वार्थबोधकं विभक्त्यन्तं, यत्र किंपदासत्त्वे तादृशविभक्त्यन्तसमुदायार्थस्य विशेष्ये यादृशसम्बन्धेनान्वयस्तादृशसम्बन्धावच्छिन्नप्रकारितैव तादृशार्थस्य किंपदार्थे संसर्गोऽतः किमिन्दुरित्यादावभेदेन चन्द्रादिप्रकारिका धनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वत्वादिप्रकारिका सम्भावना नियमतः प्रतीयते किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिप्रतीतिस्तात्पर्यो । कुत्सार्थकमपि क्वचित्किंपदं यथा किङ्गौरित्यादौ ।"

**किमिच्छक** त्रि० किमिच्छसि किमिच्छसीति पृच्छति पृषो० । किमिच्छसि किमिच्छसीति प्रश्नकारके भोजनाद्यर्थमाह्वानाय नियुक्ते १भृत्यादौ । "सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा। गोभिर्वस्त्रैश्च राजेन्द्र! विविधैश्च किमिच्छकैः" भा० शा० २८ "किमिच्छसि किमिच्छसीतिप्रश्नकारकैर्भृत्यैः विविधैर्गोवस्त्रादिभिर्निमन्त्रयद्भिः" नीलक०। किमिच्छसीति प्रश्नेन दानार्थं कायति शब्दायतेऽत्र पृषो०। २मार्कण्डेयपुराणोक्ते व्रतभेदे पु० तद्व्रते हि "पुरोहितस्य वीरायाः (तन्नामराजमहिष्याः) वदतोऽर्थिजनं प्रति । कः किमिच्छति दुःसाध्यम् कार्य्यं किंसाध्यतामिति । करन्धमस्य महिषी किमिच्छकमुपोषिता । राजपुत्रोऽप्यविक्षित्तु श्रुत्वा पौरोहितं वचः । प्रत्युवाचार्थिनः सर्व्वान् राजद्वारमुपागतान् । मया साध्यं शरीरेण कार्य्यं किञ्चित् ब्रवीतु मे । मम माता महाभागा किमिच्छकमुपोषिता । शृण्वन्तु मेऽर्थिनः सर्व्वे प्रतिज्ञातं मयात्र वै। किमिच्छथ ददाम्येवं क्रियमाणे किमिच्छके" अर्थिनोऽभिलाषानुरूपदानार्थं केच्छाप्रश्नपूर्व्वकं तद्दानं विहितमिति तस्य तथात्वम् । ३इच्छाविषयप्रश्नपूर्व्वकेष्टेच्छानुरूपदेयमात्रेऽपि "प्रतिश्रयान् सभाः कूपान् प्रपाः पुष्करिणीस्तथा । नैत्यकानि च सर्व्वाणि किमिच्छकमतीव च" भा०शा०६६८५ श्लो०

**किमीदिन्** त्रि० किमिदानीमिति चरति किम्+इदानी-